# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-१ (SEM-1) | प्रश्नपत्र-५ | गुणाः - ७० |
| विषयः- साहित्यम् | CC-111 | समयः - ०३ तः ०६ |
| दिनाङ्कः - ०९/१२/२०१६ | सन्दर्भग्रन्थः - साहित्यदर्पणः ( प्रथमद्वितीयपरिच्छेदौ ) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः सन्दर्भपूर्वकं व्याख्यां कुर्वन्तु ।** **०८**

१. शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी ।
अपहृत्य तमः सन्ततमर्थानखिलान्प्रकाशयतु ॥

२. कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ॥

३. उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ।

**प्र-२ कस्याप्येकस्य परिचयात्मकमुत्तरं लिखन्तु ।** **०८**

१. तदोषौ शब्दार्थौ - इति काव्यलक्षणस्य साहित्यदर्पणदिशा खण्डनं कुर्वन्तु ।

२. विश्वनाथस्य जीवनपरिचयो देयः ।

**प्र-३ द्वयोः टिप्पणीं लिखत ।** **०४**

१. दोषस्वरूपम् ।

२. काव्यप्रयोजनम् ।

३. वाक्यं रसात्मकं काव्यम् ।

४. विश्वनाथस्य ग्रन्थाः ।

**प्र-४ पञ्चप्रश्नाः एकेन वाक्येन समाधेयाः ।** **०५**

१. प्रथमपरिच्छेदस्य नाम किम्?

२. न्यक्कारो ह्ययमेव - पद्ये कः दोषः?

३. नरत्वं दुर्लभं लोके – इति कस्योक्तिः?

४. काव्यस्यात्मा ध्वनिः - इति कस्य कथनम्?

५. यस्यालीयत शल्कसीम्नि - इत्यस्मिन् पद्ये कः ध्वनिः?

६. मधु द्विरेफः कुसुमैकपात्रे पपौ - इत्यस्मिन् पद्ये कः ध्वनिः?

७. साहित्यदर्पणे कति परिच्छेदाः?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ द्वयोः व्याख्यां कुर्वन्तु ।** **०८**

१. वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।

२. तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा ।

३. मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता ॥

**प्र-६ कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखन्तु । ०८**

१. ग्रन्थोक्तदिशा वाक्यस्वरूपं प्रतिपादयन्तु ।

२. सङ्केतग्रहोपायं चतुर्विधसङ्केतक्षेत्रसहितं ग्रन्थोक्तदिशा वर्णयन्तु ।

**प्र-७ टिप्पणीं लिखन्तु । ( एका ) ०२**

१. महावाक्यस्वरूपम् ।

२. कर्मणिकुशलः - इत्यत्र साहित्यदर्पणकारस्य अभिप्रायः ।

**प्र-८ त्रयः प्रश्ना एकेन वाक्येन समाधेयाः । ०२**

१. कति शब्दशक्तयः?

२. मुख्यार्थस्य बोधः कया शब्दशक्त्या भवति?

३. व्यङ्ग्यार्थः कया शब्दशक्त्या प्रतीयते?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः व्याख्यां कुर्वन्तु । ०८**

१. अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये ।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा ॥

२. विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥

३. शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥

**प्र-१० एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखन्तु । ०८**

१. आर्थीव्यञ्जनां सोदाहरणं ग्रन्थोक्तदिशा प्रतिपादयन्तु ।

२. लक्षणाभेदाः सोदाहरणं ग्रन्थोक्तदिशा वर्णनीयाः ।

**प्र-११ टिप्पणीं लिखत । ( द्वयोः ) ०४**

१. उपादानलक्षणा

२. लक्षणामूलाव्यञ्जना ।

३. अभिधामूलाव्यञ्जना ।

४. तात्पर्या ।

**प्र-१२ पञ्चप्रश्नाः एकेन वाक्येन समाधेयाः । ०५**

१. अभिधानियामकतत्त्वानि कति?

२. प्रयोजनस्य प्रतीतिः कया व्यञ्जनया भवति?

३. लक्षणाभेदाः कति?

४. सादृश्येतरसम्बन्धा लक्षणा का?

५. आयुर्घृतम् - इत्यत्र कः सम्बन्धः?

६. निःशेषच्युतचन्दनं स्तनतटम् - इत्यत्र का व्यञ्जना?

७. द्वितीयपरिच्छेदस्य नाम किम्?